**धार्य्य** त्रि० धारि—यत् । धारणीये "धार्य्यः कथङ्कारमहं भवत्या वियद्विहारी वसुधैकगत्या" नैष० । "कार्य्यञ्च तस्य दशधा हार्य्यं धार्य्यं प्रकाश्यञ्च" सा० का० "एवं धार्य्यम् अन्तःकरणादित्रिकस्य प्राणादिलक्षणया वृत्त्या शरीरं तच्च पार्थिवादि पाञ्चभौतिकं शब्दादीनां पञ्चानां समूहः पृथिवीति ते च पञ्च दिव्यादिव्यतया दशेति धार्य्यमपि दशधा" सा० कौ० ।

**धार्ष्ट्य** न० धृष्टस्य भावः कर्म वा ष्यञ् । प्रागल्भ्ये निर्लज्जत्वे । "धार्ष्ट्यमेतत्तयोर्विप्र ! मत्तो यत्तु करग्रहः । अहो धार्ष्ट्यमहो धार्ष्ट्यं तयोः क्षत्रियवीरयोः" हरिवं० २०६ अ० ।

**धार्ष्णक** न० धृष्णोर्न्दपस्य पुत्रभेदे "धृष्णोस्तु धार्ष्णकं क्षत्रं रणे धृष्टं बभूव ह" हरिवं० १५ अ० ।

**धाव** जवे शुद्धौ अक० शुद्धीकरणे संमार्जने च सक० भ्वा० उभ० सेट् । स्वरितेत् पा० । धावति धावते अधावीत् अधाविष्ट दधाव—वे । सार्वधातुके परतः वेगगतौ सर्त्यादेशस्तु पर० । अनेनैवोपपत्तौ तदादेशविधानं वेगगतौ सरतेः सार्वधातुके प्रयोगवारणार्थं शब्दस्तोमे आत्मनेपदत्वोक्तिः छन्दादोषात् । "गच्छति पुरःशरीरं धावति पश्चादसंस्थितं चेतः" शकु० । "रेतः सिक्तमधावत्" ऐ०ब्रा० । "अधावीच्चारिसंमुखम्" भट्टिः । "यथा पराञ्चं धावन्तमनुलिप्सेत" शत०ब्रा० ३।२।१।२६ । "दिवस्पृष्ठे धावमानं सुपर्णम्" अथ० १३।२।३७ "सततं धावमानस्य चिन्तमानो विशाम्पते !" भा० व० १८८ अ० । जवे अस्य न उदित्त्वम् तेन धावित्वा धावित इत्यादि "द्विपस्तस्तः सहसा प्रधाविताः" भा० श० २० अ० । "वनान्तरे तोयमिति प्रधाविताः" । ऋतुसं० अन्यत्रार्थे उदित् धावित्वा धौत्वा धौत इत्यादि । "बाह्योद्यानस्थित् हरशिरश्चन्द्रिकाधौतहर्म्या" "धौतापाङ्गं हरशशि-रुचा" मेघ० । "तुषारस्रुतिधौतरक्तम्" कुमा० । प्रादुपसर्गपूर्वकस्तु तत्तदुपसर्गद्योतार्थयुक्ते धावने ।

**धावक** पु० धावति वस्त्रादिकं शोधयति धाव—ण्वुल् । १रजके २वस्त्रादिप्रक्षालके ३शीघ्रगामिनि (धाउड़िया) च त्रि० ४नागानन्दरत्नावलीकारके कविभेदे पु० "श्रीहर्षादेर्धाव-कादीनामिव धनम्" काव्यप्र० । "प्रथितयशसां धावकसौमिल्ल कविपुत्रादीनां प्रबन्धानतिक्रम्येति" मालविकाग्निमित्रम् ।

**धावन** न० धाव—भावे ल्युट् । १शीघ्रगमने २प्रक्षालने च । "हरणादिर्हितस्तत्र धावने पूरणे तथा" सुश्रुतः । "उच्छिष्टं नैव भुञ्जीयां न कुर्य्यात् पादधावनम्" भा० व० ६५ अ० ।

**धावनि** स्त्री धाव—अनि । १पृश्निपर्ण्याम् अमरः । २कण्ट-कार्य्यां राजनि० । स्वार्थे क धावनिका तत्रार्थे रत्नमा० वा ङीप् । धावनी तयोरर्थयोः मेदि० ३धातक्यां राजनि०

**धासस्** पु० धा—"वहिहाधाञ्भ्यश्छन्दसि" उणा० असुन् "पचिवचिभ्यां सुट् च" उणा० युटोऽनुवृत्तिः उज्ज्वलदत्तः माधवस्तु "वसेर्णित्" उणा० इत्यतो णितोऽनुवृत्तिमाह न युट इति भेदः तेन तन्मते धाया इत्येव । धायस्शब्दे दृश्यम् । पर्वते उज्ज्वलदत्तः ।

**धासि** पु० धारयति प्राणान् धा—वा असि । अन्ने निरु० सद्य-श्चिद्या दुदुहे भूरि धासेः" ऋ० ३।५७।१ "धासेरन्नस्य" भा० "महीं मित्रस्य वरुणस्य धासिम्" १०।३०।१ ।

**धि** धृतौ तु० पर० सक० अनिट् । धियति अधैषीत् । दिधाय ।

**धिक्** अव्य० धक्क—नाशने धा—धारणे वा बा० डिकन् । १अप-कारशब्दैर्भयोत्पादने २निर्भर्त्सने ३निन्दायाञ्च । एत-द्योगे निन्दाविषयवाचकशब्दात् द्वितीया । "धिक् धिक् शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा" सा० द० । "धिगस्तु तृष्णातरलं भवन्मनः" नैष० । निन्दनीयपरत्वे न द्वितीया किन्तु प्रथमैव । "धिङ्माता मम कैकेयी यया पापमिदं कृतम्" रामा० अयो० ८२ स० ।

**धिक्कृ** धिक्+निन्दने कृ—करणे प्रादिस० उभ० सक० अनिट् । धिक्करोति धिगकार्षीत् धिक्चकार । धिक्कृतः (तिर-स्कृतः) धिक्कारः धिक्क्रिया इत्यादि ।

**धिच्च** सन्दीपने सक० क्लेशे जीवने अक० भ्वा० आत्म० सेट् । धिच्चते अधिच्चिष्ट दिधिच्चे ।

**धिग्दण्ड** पु० धिगिति दण्डः । निर्भर्त्सनरूपे दण्डे "वाग्-दण्डं प्रथमं कुर्य्यात् धिग्दण्डं तदनन्तरम्" मनुः ।

**धिग्वण** पुंस्त्री मनूक्ते सङ्कीर्णजातिभेदे "ब्राह्मणादुग्रकन्यायां आवृतो नाम जायते । आभीरोऽम्बष्ठकन्यायामायोग-व्यान्तु धिग्वणः" मनुः । "शूद्रेण वैश्यायामुत्पन्ना आयो-गवी तस्यां ब्राह्मणाद्धिग्वणो जायते" कुल्लू० । "धिग्व-णानां चर्म कार्य्यं वेणानां भाण्डवादनम्" मनुना तद्वृत्तिरुक्ता ।

**धित** त्रि० धा—क्त छान्दसो न हिः । हिते निहिते । "सुधीवानं धितावानम्" ऋ० ३।२७। २धृते च ।

**धिति** स्त्री धि—धृतौ क्तिन् । धारणे

**धिप्सु** त्रि० दन्भ—सन् इडभावपक्षे "दम्भ इच्च अभ्यासलोपः" ततः उ । दम्भितुमिच्छौ वञ्चयितुमिच्छौ "भूयस्तं धिप्सुमाहूय राजपुत्रं दिदम्भिषुः" भट्टिः ।